# राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालय:)

(विश्वविद्यालयानुदानायोगाधिनियमस्य १९५६ धाराया: तृतीयानुभागेन स्थापित:)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा ए श्रेण्यां प्रमाणित:

तिरुपति: - ५१७५०७(आ. प्र.)

## वाग्वर्धिनीपरिषद्

दिनाङ्क: - २०-१०-२०१६

**सेवायाम्**

**विषय: - एकादश - अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोह: - २०१७ आमन्त्रणस्य सम्बन्धे।**

मान्या:

पारम्परिकशास्त्रसमुत्कर्षकेन्द्रत्वेन प्रसिद्धेन तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठेन शास्त्राणां संरक्षणाय संवर्द्धनाय च अविच्छिन्नरूपेणाधुनिके जगतितले सततप्रयासो विधीयते ।

अखिलभारतस्तरे विद्यापीठमिदं संस्कृतशिक्षाया: प्रमुखसंस्थात्वेन बहुकालात् प्रसिद्धं सत् प्रमाणयति यत् शिक्षाया: लक्ष्यं न केवलं छात्राणां ज्ञानसंवर्द्धनम् , अपि तु तेषामन्तर्निहितप्रतिभाप्रकाशनेन सर्वाङ्गीणविकाससाधनमिति । तदर्थमेव विद्यापीठेऽस्मिन् छात्रप्रतिभाऽन्वेषणाय प्रतिवर्षं विविधा: शैक्षिकसांस्कृतिकक्रीडादिस्पर्धा: समायोज्यन्ते । तदङ्गत्वेन संस्कृतच्छात्रेषु उत्साहसंवर्द्धनाय विद्यापीठमिदं २००७ संवत्सरादारभ्य नियमितरूपेण दिनचतुष्टयात्मकम् अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहं सफलतया समायोजयति। ऐषमोऽपि विद्यार्थिविकासयोजनान्तर्गतत्वेन विद्यापीठीयवाग्वर्धिनीपरिषदा **एकादश-अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोह:** अखिलभारतीयस्तरे **३०.०१.२०१७ त: ०२.०२.२०१७ पर्यन्तं** समायोक्ष्यते ।

तत्रभवन्तो भवन्त: समारोहेऽस्मिन् विविधस्पर्धासु भागं ग्रहीतुं भवत्संस्थात: छात्रान् कृपया प्रेषयन्त्विति सम्प्रार्थना ।

## समारोहस्य सम्पूर्णविवरणी अधोलिखिता वर्तते

**समारोहस्यास्य सन्त्यधोलिखितान्युद्देश्यानि-**

१. संस्कृतच्छात्राणां शैक्षिकसांस्कृतिककौशलविकासायावसरप्रदानम् ।

२. विभिन्नसंस्कृतसंस्थानां संस्कृतच्छात्राणां मध्ये सौहार्दस्य द्रढीकरणम् ।

३. संस्कृतच्छात्रेषु स्पर्धायामुत्साहसंवर्द्धनम् ।

४. अखिलभारतस्तरे कोणे कोणे विद्यमानानां संस्कृतसंस्थानां छात्राणाञ्च आत्ममूल्याङ्कनाय गवेषणाय चावकाशप्रदानम् ।

५. संस्कृतच्छात्राणां वक्तृत्व-सांस्कृतिक-वादविवादकौशलानां संवर्द्धनाय प्रेरणाप्रदानञ्च । अनेन ते तेषां सन्तुलितव्यक्तित्वविकासेन भारतस्य दायित्वसंपन्ननागरिकाः भवेयुः ।

## समारोहे आयोज्यमानाः स्पर्धाः

### (क) शैक्षिकस्पर्धाः

**(१) शास्त्रार्थस्पर्धाः**

*अधोनिर्दिष्टेषु शास्त्रेषु भाषणस्पर्धाः*

(अ) वेदे

(आ) साहित्ये

(इ) व्याकरणे

(ई) न्यायवैशेषिकयोः

(उ) साङ्ख्ययोगयोः

(ऊ) पूर्वमीमांसायाम्

(ऋ) वेदान्ते

(ॠ) धर्मशास्त्रे

(ए) ज्यौतिषे

(ऐ) पुराणेतिहासयोश्च

**(२) अन्त्याक्षरी**

**(३) आशुकविता / समस्यापूर्तिः**

**(४) रसप्रश्नाः**

### (ख) सांस्कृतिकस्पर्धाः

(अ) संस्कृतगीतगानस्पर्धा(ललितसंगीतम्)

(आ) एकपात्राभिनयस्पर्धा

(इ) एकाङ्किकाभिनयस्पर्धा

(ई) भारतीयजानपदनृत्यस्पर्धा (लोकनृत्यस्पर्धा)

# पुरस्काराः

## वैयक्तिकस्पर्धानां पुरस्काराः -

प्रथमः पुरस्कारः - स्वर्णपदकं, प्रमाणपत्रम्, एकसहस्त्ररूप्यकाणि च ।

द्वितीयः पुरस्कारः - रजतपदकं, प्रमाणपत्रं, सार्धसप्तशतरूप्यकाणि च।

तृतीयः पुरस्कारः - कांस्यपदकं, प्रमाणपत्रं, पञ्चशतरूप्यकाणि च ।

सान्त्वनापुरस्कारः - प्रमाणपत्रं, सार्धद्विशतरूप्यकाणि च।

## सामूहिकपुरस्काराः -

प्रथमः पुरस्कारः - प्रमाणपत्रं धनराशिश्च ।

द्वितीयः पुरस्कारः - प्रमाणपत्रं धनराशिश्च ।

तृतीयः पुरस्कारः - प्रमाणपत्रं धनराशिश्च ।

सान्त्वनापुरस्कारः - प्रमाणपत्रं धनराशिश्च ।

## चलवैजयन्तीपुरस्कारः -

सर्वोच्चाङ्कान् प्राप्तवते संस्कृतानुष्ठानाय चलवैजयन्ती प्रदीयते ।तदर्थमङ्कनिर्धारणमेवं भवति-

| | शैक्षिकस्पर्धानाम् | सांस्कृतिस्पर्धानाम् |
|---|---|---|
| प्रथमः पुरस्कारः | ५ अङ्काः | ५ अङ्काः |
| द्वितीयः पुरस्कारः | ३ अङ्काः | ३ अङ्काः |
| तृतीयः पुरस्कारः | २ अङ्कौ | २ अङ्कौ |
| सान्त्वनापुरस्काराः | १ अङ्कः | १ अङ्कः |

# परिशिष्टम्

## साधारणनियमाः

(१) प्रतिसंस्कृतानुष्ठानमधिकाधिकं चतुर्दशच्छात्रैः सहितः वर्गः प्रेषणीयः । तेन सह कश्चन एकोऽध्यापकः प्रेषणीयः ।

(२) **स्पर्धायां भागग्रहणाय छात्राणां योग्यता-**

(अ) तत्तदनुष्ठानानां नियमिताः (Regular)छात्रा एव भागं ग्रहीतुमर्हन्ति। शास्त्री अथवा B.A(Sans.), आचार्य (M. A.(Sans.) तत्समकक्षाः छात्रा एव भागं ग्रहीतुमर्हन्ति। शिक्षाशास्त्रि-शिक्षाचार्य-एम्.फिल्-विद्यावारिधिः (BEd., MEd., M. Phil., Ph. D.)छात्राः अस्यां स्पर्धायां भागं ग्रहीतुं नार्हन्ति । **दूरस्थशिक्षाकेन्द्रे** पञ्जीकृताश्छात्राः (D.D.E.) अप्यत्र भागं ग्रहीतुं नार्हन्ति ।

(आ) पिस्पर्धिषु छात्रः एकस्यैव विश्वविद्यालयस्य प्रतिनिधिर्भवेत् ।

(इ) छायाचित्र-कक्ष्यासूचनासहितानि परिचयपत्राणि तत्तदनुष्ठानाधिकारिणां हस्ताक्षराङ्कितानि छात्रैरवश्यमानेयानि ।

(३) **क्रमशिक्षणम् (Discipline)-**

सर्वैः पिस्पर्धिभिः छात्रैः क्रमशिक्षणैः (Disciplined) भाव्यम् । यः क्रमशिक्षणरहितः किमपि असामाजिकं कार्यं कुर्वन् लक्षितः चेत् स्पर्धायां भागग्रहणाय अनर्हः इति घुष्यते ।

(४) प्रतिसंस्थं शैक्षिकस्पर्धायां भागग्राही वर्गः एव सांस्कृतिकस्पर्धासु भागं ग्रहीतुमर्हति । स च वर्गः न्यूनातिन्यूनम् एकस्यां शैक्षिकस्पर्धायामवश्यं भागं गृह्णीयात् ।

(५) एकस्यां स्पर्धायां चत्वारः भागग्रहीतारः लभ्यन्ते चेदेव स्पर्धा आयोज्यते ।

(६) निर्णायकानां निर्णयः एव सर्वमान्यः अन्तिमश्च ।

(७) **यात्राव्ययविवरणम् -**

प्रतिभागिनां छात्राणां मार्गनिर्देशकायाध्यापकाय च द्वितीयश्रेणी (Sleeper) रेल्यानस्य यात्रा व्ययः विद्यापीठेन दीयते । तत्तद्विद्यासंस्थाधिकारिभिः रेलयानतरमूल्यत्यजनं (Railway fare Concession) स्वीकरणीयमिति सूच्यते । **विद्यापीठेन तत्कालचिटिकायाः देयमूल्यं नैव प्रदास्यते ।**

(क) प्रतिभागिनां छात्राणामावासव्यवस्था विद्यापीठेन कल्प्यते । आच्छादनशयनवस्त्रादिकं (Bed-sheet) स्वयमेव आनयेयुः । तदवसरे तिरुपतिनगरस्य जलवायुः सुखदस्तथा स्थानीया तापमात्रा २०-२२ड़ीग्रीपरिमिता भवितुमर्हति।

(ख) पञ्जीकरणार्थं सम्बद्धसंस्थाः पञ्जीकरणपत्राणि यथावत्प्रपूर्य निर्दिष्टदिनाङ्के प्रेषयेयुः ।

# विभिन्नस्पर्धानां नियमा:

## (क) शैक्षिकस्पर्धा:

सम्बद्धसंस्थाभ्य: आगतेषु चतुर्दशच्छात्रेषु अधिकाधिकम् अष्टौ छात्रा: शैक्षिकस्पर्धासु भागं गृह्णीयु:। एक: छात्र: तिसृषु स्पर्धासु भागं ग्रहीतुमर्हति । यथा- एक: छात्र: भाषणे, अन्त्याक्षर्यां, रसप्रश्ने च अथवा भाषणे समस्यापूर्त्तौ रसप्रश्ने च अथवा रसप्रश्ने अन्त्याक्षर्यां समस्यापूर्त्तौ च ।

**(अ) शास्त्रभाषणस्पर्धा: -**

(क) शास्त्रभाषणस्पर्धायां भागग्राहीच्छात्र: अधिकाधिकं शास्त्रद्वये भागं ग्रहीतुमर्हति ।

(ख) परमेकस्यानुष्ठानस्य द्वौ छात्रौ एकस्मिन्नेव शास्त्रे भागं ग्रहीतुं नार्हत: ।

(ग) शास्त्रभाषणस्पर्धाविषय: २४ होराभ्य: पूर्वमेव उद्घोष्यते ।

(घ) प्रतिच्छात्रं पञ्चनिमेषा: भाषणाय दीयन्ते, तत्र चत्वार: निमेषा: भाषणाय, एक: निमेष: प्रश्नसमाधानाय च विभज्यन्ते ।

**(आ) अन्त्याक्षरी**

अस्यां स्पर्धायां सर्वे स्पर्धालव: भागं ग्रहीतुमर्हन्ति ।

**(इ) आशुकविता / समस्यापूर्त्ति:**

अस्यां स्पर्धायां सर्वेऽपि भागं ग्रहीतुमर्हन्ति ।

**(ई) रसप्रश्न: (प्रश्नमञ्च:)/ Quiz**

एकस्मात् अनुष्ठानात् कावपि द्वौ छात्रौ एव भागग्राहिणौ भवत: ।

(रसप्रश्ना: वेद-वेदाङ्ग-पुराण-इतिहास-दर्शन-काव्येषु सामान्यज्ञाने च भविष्यन्ति ।)

## (ख) सांस्कृतिकस्पर्धा:

प्रत्यनुष्ठानं चतुर्दशस्पर्धालवोऽपि अत्र भागं ग्रहीतुमर्हन्ति ।

**(१) संस्कृतगीतगानस्पर्धा (ललितसंगीतं, वैयक्तिकम्)-**

(अ) अत्र संस्कृतगीतानि यथा भजनं, कीर्तनं, स्वीयगीतं वा प्रस्तोतुं शक्यते ।

(आ) चलनचित्रगानानि सर्वथा निषिद्धानि ।

(इ) प्रतिविश्वविद्यालयम् एक: एका वा भागम् गृह्णीयात् । तत्र द्वावेव वाद्यसहकारार्थम् भवितुमर्हत: । तयो: मार्गव्ययादिकं तत्तदनुष्ठानद्वारा वोढव्यम् ।

(ई) समयावधि: - ५+१ निमेषा:।

**(२) एकपात्राभिनयस्पर्धा -**

(अ) दशनिमेषात्मक: समय: ।

(आ) भाषा तु संस्कृतमेव भवेत् ।

(इ) वेषभूषादिसज्जीकरणाय व्यय: स्वयमेव वोढव्य: ।

(ई) एकेन एकया वा एकस्यैव पात्रस्य अभिनय: कर्त्तव्य: ।

(उ) प्रतिभागिवर्ग: एकपात्राभिनयस्य सारसंग्रहं पूर्वमेव पञ्जीकरणपत्रेण सह दद्यात् । कालान्तरप्रवेश: नाङ्गीकरिष्यते ।

(ऊ) प्रतिविद्यालयम् एक: / एका वा भागं ग्रहीतुमर्हति ।

**(३) एकाङ्किकाभिनयस्पर्धा -**

(अ) एक: वर्ग: एकामेव एकाङ्किकां प्रदर्शयेत् ।

(आ) एकाङ्किकाप्रदर्शनकाल: त्रिंशन्निमेषा: । कदापि निश्चितसमय: नातिक्रमणीय: ।

(इ) पात्रग्राहिण: दशाधिका: न भवेयु: ।

(ई) वस्त्राभूषणादिव्यवस्था स्वयमेव कार्या ।

(उ) एकाङ्किका: पौराणिकं, प्राचीनम्, आधुनिकं वा विषयमवलम्ब्य संस्कृतभाषायामेव निबद्धा: भवेयु: ।

(ऊ) प्रतिभागिवर्गेण तस्या: एकाङ्किकाया: सारसंग्रह: पञ्जीकरणपत्रेण सहैव समर्पणीय: । कालान्तरप्रवेश: नाङ्गीकरिष्यते ।

**(४) जानपदनृत्यस्पर्धा (लोकनृत्यस्पर्धा)**

(अ) प्रतिवर्गमेकमेव नृत्यं प्रदर्शनीयम् ।

(आ) अधिकाधिका: दशच्छात्रा: भवेयु: ।

(इ) आहार्याभिनयव्यवस्था प्रतिभागिभि: स्वयमेव स्वीयव्ययेनैव कार्या ।

(ई) नृत्यस्य गीतम् संस्कृतमेव भवेत् ।

(उ) चलनचित्रगीतानि तेषाम् अनुकरणानि वा न भवेयु: ।

(ऊ) प्रतिभागिन: सङ्गीतोपकरणानि ध्वनिमुद्रिकादीनि उपयोक्तुं शक्नुवन्ति । किन्तु तानि च स्वयमेव आनेतव्यानि ।

(ऋ) प्रतियोगिताया: समय: दशनिमेषात्मक एव ।

स्वीकृतिपत्रं तु २५ नवम्बर २०१६ दिनाङ्कात् पूर्वं विद्यापीठं प्रति प्रेषणीयम् ।

प्रपूरितान्यावेदनपत्राणि अधोनिर्दिष्टसङ्केताय (EMS / Speed Post द्वारा) प्रेषयेयुः । स्पर्धाविषये या काऽपि जिज्ञासा तथा समाचारप्राप्तिसूचना च अधोनिर्दिष्टसङ्केतमाध्यमेन विधातव्या ।


**डॉ. चक्रवर्तिरङ्गनाथन्**
संयोजकः
**वाग्वर्धिनीपरिषद्**
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः- ५१७५०७
दूरभाषा-(0877) 2287649 Extn. 322 (O) ; 2287838 (Fax); 2287809 (Fax)
चलद्वाणी- **09440919186**

अथवा

**प्रो. सि. उमाशङ्करः**
कुलसचिवः
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः- ५१७५०७
दूरभाषा- 0877-2286799
Fax No. **0877-2287809**
Website: http://www.rsvidyapeetha.ac.in

**सर्वविषयप्राप्तये**

**डॉ. भारतभूषणरथः**
**डॉ. ओ.जी.पी.कल्याणशास्त्री**
सहसंयोजकौ
वाग्वर्धिनीपरिषद्
चलद्वाणी - **08897426243, 08885673667**
***Email : paramatmabharat@gmail.com***
***rsudhanvan@gmail.com***


धन्यवादपुरस्सरम्

भवदीयः
कुलसचिवः